# श्रीमद्-भगवद्-गीता Śrīmad-Bha-ga-vad-Gīta

## Chapter 2 (sāṅ-khya-yo-gaḥ - The Yoga of Knowledge) Verses 1 - 18

| | |
|---|---|
| ॐ हरिः ॐ | om hariḥ om |
| श्री गुरुभ्यो नमः | śrī gu-ru-bhyo na-maḥ |
| हरिः ॐ | hariḥ om |
| ॐ श्री कृष्णपरमात्मने नमः | om śrī kṛṣ-ṇa-pa-ra-māt-ma-ne na-maḥ |
| श्रीमद्-भगवद्-गीता | śrīmad-bha-ga-vad-gī-tā |
| अथ द्वितीयोऽध्यायः । | a-tha dvi-tī-yo-'dhyā-yaḥ । |
| साङ्ख्ययोगः । | sāṅ-khya-yo-gaḥ। |

सञ्जय उवाच । — sañ-ja-ya u-vā-ca ।
तं तथा कृपयाविष्टम् — taṁ ta-thā kṛ-pa-yā-viṣ-ṭam
अश्रुपूर्णाकुलेक्षणम् । — a-śru-pūr-ṇā-ku-lek-ṣa-ṇam ।
विषीदन्तमिदं वाक्यम् — viṣī-dan-tam-idaṁ vāk-yam
उवाच मधुसूदनः ॥ १ ॥ — u-vā-ca ma-dhu-sū-da-naḥ ॥ 1 ॥

श्रीभगवानुवाच । — śrī-bha-ga-vān-u-vā-ca ।
कुतस्त्वा कश्मलमिदं — ku-tas-tvā kaś-ma-lam-idaṁ
विषमे समुपस्थितम् । — vi-ṣa-me sa-mu-pas-thi-tam ।
अनार्यजुष्टमस्वर्ग्यम् — a-nār-ya-juṣ-ṭam-as-varg-yam
अकीर्तिकरमर्जुन ॥ २ ॥ — a-kīr-ti-ka-ram-ar-juna ॥ 2 ॥

| | |
|---|---|
| क्लैब्यं मा स्म गमः पार्थ | klaib-yaṁ mā sma ga-maḥ pārtha |
| नैतत्त्वय्युपपद्यते । | nai-tat-tvay-yu-pa-pad-ya-te । |
| क्षुद्रं हृदयदौर्बल्यं | kṣud-raṁ hṛ-da-ya-daur-bal-yaṁ |
| त्यक्त्वोत्तिष्ठ परन्तप ॥ ३ ॥ | tyak-tvot-tiṣ-ṭha pa-ran-ta-pa ॥ 3 ॥ |

| | |
|---|---|
| अर्जुन उवाच । | ar-ju-na u-vā-ca । |
| कथं भीष्ममहं सङ्ख्ये | ka-thaṁ bhīṣ-mam-ahaṁ saṅ-khye |
| द्रोणं च मधुसूदन । | dro-ṇaṁ ca ma-dhu-sū-dana । |
| इषुभिः प्रतियोत्स्यामि | iṣu-bhiḥ pra-ti-yots-yā-mi |
| पूजार्हावरिसूदन ॥ ४ ॥ | pū-jār-hā-vari-sū-dana ॥ 4 ॥ |

| | |
|---|---|
| गुरूनहत्वा हि महानुभावान् | gurū-na-hatvā hi ma-hā-nu-bhā-vān |
| श्रेयो भोक्तुं भैक्ष्यमपीह लोके । | śre-yo bhok-tuṁ bhaikṣ-yam-apī-ha lo-ke । |
| हत्वार्थकामांस्तु गुरूनिहैव | hatvār-tha-kā-māṁs-tu gurū-ni-hai-va |
| भुञ्जीय भोगान् रुधिरप्रदिग्धान् ॥ | bhuñ-jī-ya bho-gān ru-dhi-ra-pra-dig-dhān ॥ |
| ॥ ५ ॥ | ॥ 5 ॥ |

| | |
|---|---|
| न चैतद्विद्मः कतरन्नो गरीयः | na cai-tad-vid-maḥ ka-ta-ran-no ga-rī-yaḥ |
| यद्वा जयेम यदि वा नो जयेयुः । | yadvā ja-ye-ma ya-di vā no ja-ye-yuḥ । |
| यानेव हत्वा न जिजीविषामः | yā-ne-va hatvā na ji-jī-vi-ṣā-maḥ |
| तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ | te'-vas-thi-tāḥ pra-mu-khe dhār-ta-rāṣ-ṭrāḥ ॥ |
| ॥ ६ ॥ | ॥ 6 ॥ |

| | |
|---|---|
| कार्पण्यदोषोपहतस्वभावः | kār-paṇ-ya-do-ṣo-pa-ha-ta-sva-bhā-vaḥ |
| पृच्छामि त्वां धर्मसम्मूढचेताः । | pṛc-chā-mi tvāṁ dhar-ma-sam-mū-ḍha-ce-tāḥ । |
| यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे | yac-chre-yaḥ syān-niś-ci-taṁ brū-hi tan-me |
| शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ | śiṣ-yas-te'-haṁ śā-dhi māṁ tvāṁ pra-pan-nam ॥ |
| ॥ ७ ॥ | ॥ 7 ॥ |
| न हि प्रपश्यामि ममापनुद्यात् | na hi pra-paś-yā-mi ma-mā-pa-nud-yāt |
| यच्छोकमुच्छोषणमिन्द्रियाणाम् । | yac-cho-kam-uc-cho-ṣa-ṇam-in-dri-yā-ṇām । |
| अवाप्य भूमावसपत्नमृद्धं | a-vāp-ya bhū-mā-va-sa-pat-na-mṛd-dhaṁ |
| राज्यं सुराणामपि चाधिपत्यम् ॥८॥ | rāj-yaṁ su-rā-ṇām-api cā-dhi-pat-yam ॥ 8 ॥ |
| सञ्जय उवाच । | sañ-ja-ya u-vā-ca । |
| एवमुक्त्वा हृषीकेशं | evam-uk-tvā hṛ-ṣī-ke-śaṁ |
| गुडाकेशः परन्तपः । | gu-ḍā-ke-śaḥ paran-ta-paḥ । |
| न योत्स्य इति गोविन्दम् | na yots-ya iti go-vin-dam |
| उक्त्वा तूष्णीं बभूव ह ॥ ९ ॥ | uk-tvā tūṣ-ṇīṁ ba-bhū-va ha ॥ 9 ॥ |
| तमुवाच हृषीकेशः | ta-mu-vā-ca hṛ-ṣī-ke-śaḥ |
| प्रहसन्निव भारत । | pra-ha-san-ni-va bhā-ra-ta । |
| सेनयोरुभयोर्मध्ये | se-na-yo-ru-bha-yor-madh-ye |
| विषीदन्तमिदं वचः ॥ १० ॥ | vi-ṣī-dan-tam-idaṁ vacaḥ ॥ 10 ॥ |

| | |
|---|---|
| श्रीभगवानुवाच । | śrī-bha-ga-vān-u-vā-ca । |
| अशोच्यानन्वशोचस्त्वं | a-śoc-yān-an-va-śo-cas-tvaṁ |
| प्रज्ञावादांश्च भाषसे । | pra-jñā-vā-dāṁś-ca bhā-ṣa-se । |
| गतासूनगतासूंश्च | ga-tā-sū-na-ga-tā-sūṁś-ca |
| नानुशोचन्ति पण्डिताः ॥ ११ ॥ | nā-nu-śo-can-ti paṇ-ḍi-tāḥ ॥ 11 ॥ |
| | |
| न त्वेवाहं जातु नासं | na tve-vā-haṁ jā-tu nā-saṁ |
| न त्वं नेमे जनाधिपाः । | na tvaṁ ne-me ja-nā-dhi-pāḥ । |
| न चैव न भविष्यामः | na cai-va na bha-viṣ-yā-maḥ |
| सर्वे वयमतः परम् ॥ १२ ॥ | sar-ve va-yam-ataḥ pa-ram ॥ 12 ॥ |
| | |
| देहिनोऽस्मिन्यथा देहे | de-hi-no's-min-ya-thā de-he |
| कौमारं यौवनं जरा । | kau-mā-raṁ yau-va-naṁ ja-rā । |
| तथा देहान्तरप्राप्तिः | ta-thā de-hān-ta-ra-prāp-tiḥ |
| धीरस्तत्र न मुह्यति ॥ १३ ॥ | dhī-ras-tat-ra na muh-ya-ti ॥ 13 ॥ |
| | |
| मात्रास्पर्शास्तु कौन्तेय | mā-trā-spar-śās-tu kaun-te-ya |
| शीतोष्णसुखदुःखदाः । | śī-toṣ-ṇa-su-kha-duḥ-kha-dāḥ । |
| आगमापायिनोऽनित्याः | ā-ga-mā-pā-yi-no'-nit-yāḥ |
| तांस्तितिक्षस्व भारत ॥ १४ ॥ | tāṁs-ti-ti-kṣas-va bhā-ra-ta ॥ 14 ॥ |
| | |
| यं हि न व्यथयन्त्येते | yaṁ hi na vya-tha-yan-tye-te |
| पुरुषं पुरुषर्षभ । | pu-ru-ṣaṁ pu-ru-ṣar-ṣa-bha । |
| समदुःखसुखं धीरं | sa-ma-duḥ-kha-su-khaṁ dhī-raṁ |
| सोऽमृतत्वाय कल्पते ॥ १५ ॥ | so'-mṛ-tat-vā-ya kal-pa-te ॥ 15 ॥ |

| | |
|---|---|
| नासतो विद्यते भावः | nā-sa-to vid-ya-te bhā-vaḥ |
| नाभावो विद्यते सतः । | nā-bhā-vo vid-ya-te sa-taḥ । |
| उभयोरपि दृष्टोऽन्तः | u-bha-yor-api dṛṣ-ṭo'n-taḥ |
| त्वनयोस्तत्त्वदर्शिभिः ॥ १६ ॥ | tva-na-yos-tat-tva-dar-śi-bhiḥ ॥ 16 ॥ |
| | |
| अविनाशि तु तद्विद्धि | avi-nā-śi tu tad-vid-dhi |
| येन सर्वमिदं ततम् । | ye-na sar-vam-idaṁ ta-tam । |
| विनाशमव्ययस्यास्य | vi-nā-śam-av-ya-yas-yās-ya |
| न कश्चित्कर्तुमर्हति ॥ १७ ॥ | na kaś-cit-kar-tum-ar-ha-ti ॥ 17 ॥ |
| | |
| अन्तवन्त इमे देहाः | an-ta-van-ta ime de-hāḥ |
| नित्यस्योक्ताः शरीरिणः । | nit-yas-yok-tāḥ śa-rī-ri-ṇaḥ । |
| अनाशिनोऽप्रमेयस्य | anā-śi-no'-pra-me-yas-ya |
| तस्माद्युध्यस्व भारत ॥ १८ ॥ | tas-mād-yudh-yas-va bhā-ra-ta ॥ 18 ॥ |

| | |
|---|---|
| ॐ तत्सत् | om tat-sat |
| इति श्रीमद्भगवद्गीतासु | iti śrīmad-bhaga-vad-gī-tā-su |
| उपनिषत्सु | upa-ni-ṣat-su |
| ब्रह्मविद्यायाम् | brahma-vid-yā-yām |
| योगशास्त्रे | yoga-śās-tre |
| श्रीकृष्णार्जुनसंवादे | śrī-kṛṣ-ṇār-juna-saṃ-vā-de |
| साङ्ख्य योगो नाम | sāṅ-khya yo-go nā-ma |
| द्वितीयोऽध्यायः । | dvi-tī-yo-'dhyā-yaḥ । |
| ॐ हरिः ॐ। | om hariḥ om |
| श्री गुरुभ्यो नमः | śrī guru-bhyo namaḥ |
| हरिः ॐ । | hariḥ om । |

| | |
|---|---|
| *सर्वधर्मान्परित्यज्य* | *sar-va-dhar-mān-pari-tyaj-ya* |
| *मामेकं शरणं व्रज ।* | *mām-ekaṃ śara-ṇaṃ vra-ja ।* |
| *अहं त्वा सर्वपापेभ्यः* | *ahaṃ tvā sar-va-pā-pebh-yaḥ* |
| *मोक्षयिष्यामि मा शुचः ॥१८-६६॥* | *mok-ṣa-yiṣ-yā-mi mā śu-caḥ ॥18-66॥* |

**श्री कृष्णार्पणमस्तु**
śrī kṛṣ-ṇār-pa-ṇam-astu

